नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

No. of Printed Pages — 7

# S—71—Sanskrit (T.L.)

## माध्यमिक परीक्षा, 2011

### तृतीय भाषा ( Third Language )

### संस्कृतम्

### ( SANSKRIT )

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तरपुस्तिकायां निम्नलिखिततालिकां निर्माय सम्मुखे एव लेखनीयम् ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) 'ह' कारस्य उच्चारण स्थानमस्ति

   (अ) कण्ठः (ब) नासिका

   (स) मूर्धा (द) दन्ताः । $\frac{1}{2}$

   (ii) 'ऋ' कारस्य उच्चारणं भवति

   (अ) नासिका (ब) कण्ठः

   (स) मूर्धा (द) ओष्ठौ । $\frac{1}{2}$

   (iii) हल्दीघाटीयुद्धं ईशवीये 1576 तमे वर्षे जून मासस्य ...................... दिनाङ्के प्रारब्धम् ।

   (अ) पञ्चविंशतिः (ब) एकोविंशतिः

   (स) त्रयोविंशतिः (द) सप्तविंशतिः । $\frac{1}{2}$

   (iv) पाणिनेः श्रद्दधानोऽनसूयः पुरुषः ................ वर्षाणि जीवति ।

   (अ) नवतिः (ब) पञ्चाशत्

   (स) सहस्रम् (द) शतम् । $\frac{1}{2}$

2. निम्नलिखितौ संख्यावाचि शब्दौ संस्कृते लिखत — $\frac{1}{2} + \frac{1}{2} = 1$

   (i) 161 ( एक सौ इकसठ )

   (ii) 510 ( पाँच सौ दस ) ।

3. (i) 'लृ' कारस्य उच्चारणस्थानं किं भवति ? $\frac{1}{2}$

   (ii) 'व' कारस्य उच्चारणस्थानं किं भवति ? $\frac{1}{2}$

4. अधोलिखिताभ्यामुपसर्गधातुभ्यां क्रियापदं रचयत — $\frac{1}{2} + \frac{1}{2} = 1$

   (i) अव + गम् (ii) निस् + सृ ।

5. अधोलिखित पदयोः प्रयुक्तौ उपसर्गौ लिखत — $\frac{1}{2} + \frac{1}{2} = 1$

   (i) उज्ज्वलः (ii) अधिकृत्य ।

6. अधोलिखितेषु पदेषु सन्धिविच्छेदं कृत्वा सन्धिनामानि लिखत — 1 + 1 + 1 = 3

   (i) दिग्गजः

   (ii) सच्चित्

   (iii) सत्कारः ।

7. अधोलिखितेषु पदेषु सन्धिं कृत्वा तस्य नाम-निर्देशनं कुरुत — $1 + 1 + 1 = 3$

(i) नि: + छल:

(ii) गोविन्द: + लिखति

(iii) राम: + शेते ।

8. निम्नलिखितपदयो: संस्कृते समासविग्रहं कृत्वा समासस्य नाम लिखत — $1 + 1 = 2$

(i) पञ्चपात्रम् (ii) पीताम्बरम् ।

9. निम्नलिखितपदयो: समस्तपदं निर्माय समासस्य नामोल्लेखं कुरुत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) चन्द्र: शेखरे यस्य स:

(ii) दिनं दिनं प्रति ।

10. रेखाङ्कित पदयो: प्रयुक्त विभक्ति: तत् कारणं च लिखत — $1 + 1 = 2$

(i) वृक्षा: राजमार्गम् अभित: सन्ति ।

(ii) सीता गीतया साकं पठति ।

11. अधोलिखितपदयो: प्रकृतिप्रत्ययौ लेखनीयौ — $\frac{1}{2} + \frac{1}{2} = 1$

(i) सेवमान: (ii) नयनम् ।

12. धातु-प्रत्ययं च संयोज्य पदरचनां कुरुत — $\frac{1}{2} + \frac{1}{2} = 1$

(i) श्री + मतुप् (ii) रक्ष् + तव्यत् ।

13. निर्देशानुसारं शब्दरूपाणि लिखत — $1 + 1 + 1 = 3$

(i) युष्मद् ( षष्ठी विभक्ति, बहुवचने )

(ii) पति ( तृतीया विभक्ति, एकवचने )

(iii) यत् ( स्त्रीलिङ्ग, द्वितीया विभक्ति, द्विवचने ) ।

14. अधोलिखितेषु क्रियापदेषु धातु-लकार-पुरुषवचनानि लिखत — $1 + 1 + 1 = 3$

(i) इच्छन्तु

(ii) प्रक्ष्यामि

(iii) लभध्वे ।

15. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं संस्कृतमाध्यमेन लिखत —

2 + 3 + 5 = 10

निरपराधानां प्राणिनां हिंसनं न कर्त्तव्यम् इत्यहिंसायाः भावः । अहिंसैव धर्ममार्गः । अतएव भगवान् बुद्धः, भगवान् महावीरः, महात्मागान्धिमहोदयश्च अहिंसायाः एवोपदेशं दत्तवन्तः । अहिंसायाः प्रचारे एवै तेषां जीवनं व्यतीतम् । महात्मनो गान्धिमहोदयस्य संरक्षणे अहिंसाशस्त्रेणैव भारतवर्षं पराधीनतापाशं छित्वा स्वतन्त्रतामलभत । अहिंसाशस्त्रेणैव भीता विदेशीया भारतं त्यक्त्वा पलायिताः । एषोऽहिंसाया एव महिमाऽस्ति । भगवान् मनुरपि दशलाक्षणिक धर्मगणनायाम् अहिंसायाः प्राथम्यमुद्घोषितवान् ।

यदि संसारे हिंसायाः प्रसारः स्यात् तर्हि न कोऽपि मनुष्यो देशो वा संसारे सुखेन शान्त्या च स्थातुं शक्नोति । हिंसया मनुष्यः क्रुरः, निर्दयः, सद्भावहीनश्च भवति । अतः सर्वैरपि सर्वदा सर्वभावेन अहिंसाधर्मः पालनीयः । लोकस्य च कल्याणं कर्त्तव्यम् ।

(अ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।

(ब) उपर्युक्त गद्यांशस्य संक्षिप्तीकरणं कुरुत ।

(स) (i) निरपराधानां प्राणिनां किं न कर्त्तव्यम् ?

(ii) अहिंसायाः उपदेशं के दत्तवन्तः ?

(iii) महात्मनो गान्धिमहोदयस्य संरक्षणे कीदृशेन शस्त्रेण भारतवर्षं स्वतन्त्रतामलभत ?

(iv) भगवान् मनुः दशलाक्षणिक धर्मगणनायां कस्याः प्राथम्यमुद्घोषयत् ?

(v) कया मनुष्यः क्रूरः निर्दयः सद्भावहीनश्च भवति ?

16. निम्नलिखितेषु **द्वयोः** गद्यांशयोः हिन्दी भाषायाम् अनुवादं कुरुत — 3 + 3 = 6

(अ) चाणक्यस्य मूलनाम 'विष्णुगुप्तः' इति आसीत् । सः चणकस्य पुत्र आसीत् अतएव 'चाणक्यः' इत्यपि कथ्यते । तस्य एव अपरं नाम 'कौटिल्यः' अपि आसीत् । चाणक्यस्य जन्म ख्रिस्तपूर्वं तृतीयशताब्द्याम् अभवत् । सः स्वयं राजनीतिज्ञः आसीत् अतएव राजनीतिशास्त्रं, धर्मशास्त्रं, विधिशास्त्रम्, अर्थशास्त्रम् च अधिकृत्य 'अर्थशास्त्रम्' इति ग्रन्थस्य रचनां कृतवान् । अर्थशास्त्रे राजनीतिविषयकाणि सूत्राणि सन्ति ।

(ब) शत्रुभिः सह दीर्घकालीनानां युद्धानां कारणेन मेवाडराजस्य स्थितिः समीचीना न आसीत् । अनेकानि स्थानानि शत्रुवशं गतानि । अतएव प्रतापः स्वामिभक्तसामन्तानां स्थानीयभिल्लजनानां च सङ्घटनं कृतवान् । सः प्रतिज्ञां कृतवान् — ''यावत् अहं हस्तच्युतान् स्वराज्यस्य भागान् पुनः न प्राप्स्यामि तावत् सुवर्णपात्रेषु भोजनं न करिष्यामि, राजप्रासादे बासं न करिष्यामि, मृदुतल्पे च शयनं न करिष्यामि'' ।

(स) राजस्थानप्रान्ते अजयमेरुनगरसमीपे पुष्करनगरम् अस्ति । पुष्करं प्रसिद्धं तीर्थस्थलं वर्तते । अत्र भगवतः ब्रह्मणः विश्वप्रसिद्धं मन्दिरम् अस्ति । विश्वे केवलं पुष्करनगरे एव ब्रह्मणः मन्दिरं वर्तते । प्राचीनवराहमन्दिरम् अपि पुष्करे अस्ति । अत्र अन्यानि अपि बहूनि मन्दिराणि सन्ति । तेषु रङ्गजीमन्दिरं प्रसिद्धम् अस्ति । पर्वतोपरि गायत्रीमन्दिरम् अस्ति । समीपे अन्यस्मिन् पर्वते सावित्रीमन्दिरम् अपि अस्ति । सरोवरस्य तटे एव पुष्करनगरम् अवस्थितम् अस्ति ।

17. अधोलिखितेषु **द्वयोः** गद्यांशयोः संस्कृते व्याख्या करणीया — 3 + 3 = 6

(अ) तदा विक्रमः तस्मै अभयं दत्त्वा नदीजले प्रविश्य पत्न्या सह तं वृद्धं महाप्रवाहात् आकृष्य तटम् आनीतवान् । वृद्धः अपि स्वस्थः भूत्वा विक्रमम् अवदत् — भो महासत्त्व ! मम एतत् शरीरं मम मातृपितृभ्याम् उत्पादितम्, इदानीं भवतः सकाशात् द्वितीयं जन्मप्राप्तम् , अतः त्वं मया उपार्जितं पुण्यं गृहाण । इत्युक्त्वा आशिषं च दत्वा सः वृद्धः पत्न्या सह निजस्थानं गतः ।

(ब) भारतवर्षस्य पुरातनाः विद्वांसः सन्ति — मरीचिः, अत्रिः, अंगिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः । ते एव सप्तऋषयः अपि कथ्यन्ते । चत्वारः वेदाः उपनिषदः पुराणानि, रामायणं, महाभारतं, षड्दर्शनानि च भारतवर्षस्य पुरातनानि शास्त्राणि सन्ति । अत्रत्याः जनाः स्वजीवने धर्म-अर्थ-कामानां प्राप्त्यर्थं प्रयत्नशीलाः भवन्ति । मृत्योः अनन्तरं मोक्षम् इच्छन्ति । एवं चतुर्णां पुरुषार्थानां प्राप्तिः एव अस्माकं जीवनस्य लक्ष्यं वर्तते ।

(स) पुरुषाणाम् अपेक्षया स्त्रीणां वाणी प्रायः मधुरा भवति । तासां स्वभावः अपि मधुरः भवति । समाजे नारी एव क्वचित् पुत्रीरूपेण, क्वचित् भगिनीरूपेण, क्वचित् पत्नीरूपेण, क्वचित् मातृरूपेण च तिष्ठति । एतासु भूमिकासु तस्याः मातृभूमिका सर्वोपरि वर्तते । स्त्रियः मातृशक्तेः प्रतीकभूताः सन्ति । अतः सर्वदा स्त्रीणां सम्मानः करणीयः । यस्मिन् समाजे स्त्रीणां सम्मानः न भवति सः समाजः उन्नतिं न प्राप्नोति ।

18. अधोलिखित पद्ययोः कस्यचित् एकस्य हिन्दी भाषायाम् अनुवादं कुरुत — 4

(अ) कुरुक्षेत्र – समराङ्गण गीता

विश्ववन्दिता भगवद्गीता ।

अमृतमधुरा – कर्म दीपिका

नैव क्लिष्टा न च कठिना ॥

(ब) स च सर्वगुणोपेतः कौशल्यानन्दवर्धनः ।

समुद्र इव गाम्भीर्ये धैर्येण हिमवान् इव ॥

19. निम्नलिखित पद्ययोः कस्यचित् एकस्य संस्कृते व्याख्यां लिखत — 4

(अ) धृतिः क्षमा दमोऽस्तेयं, शौचमिन्द्रियनिग्रहः ।

धीर्विद्या सत्यमक्रोधो, दशकं धर्मलक्षणम् ॥

(ब) महिमामण्डित भारतधरणी यस्यैकस्य महिम्ना ।

स्वाभिमान–गुरुगौरवभारं स्वदते हन्त गरिम्णा ।

सञ्जीवयति सकलमपि राष्ट्रं दत्त्वाऽक्षत–मवदानम् ।

वन्दे राजस्थानम् ।

20. अधोलिखित प्रश्नेषु केषांचित् **चतुर्णां** प्रश्नानाम् उत्तराणि संस्कृते लिखत — $4 \times 2 = 8$

(क) 'स्नेहमयी मम भारतमाता' पाठानुसारेण भारतमाता स्नेहं केभ्यः वितरति ?

(ख) 'पाणिनिः' पाठानुसारेण पाणिनेः अष्टाध्यायीम् अधिकृत्य केन वार्तिकानि लिखितानि ?

(ग) 'सूक्तिसुधा' पाठानुसारेण भूतिमिच्छता पुरुषेण के दोषाः हातव्याः ?

(घ) 'स्वभावो दुरतिक्रमः' पाठानुसारेण श्रृगालः नगरे कस्य गृहं प्रविष्टः ?

(ङ) 'बुद्धिर्यस्य बलं तस्य' पाठानुसारेण "प्रातः सकलान् पशून् मारयिष्यामि ।" इति केन कथितः ?

(च) 'यत्र नार्यस्तु पूज्यन्ते' पाठानुसारेण यत्र तु नार्यः पूज्यन्ते तत्र काः रमन्ते ?

(छ) 'पुष्करम्' पाठानुसारेण पुष्करनगरे प्रतिवर्षं कस्य मासस्य पूर्णिमायां मेला भवति ?

(ज) 'यक्षप्रश्नाः' पाठानुसारेण कः पुरुषः मृतः ज्ञेयः ?

21. अधोलिखितपाठयोः कस्यचित् एकस्य पाठस्य सारं हिन्दीभाषायां लिखत — 2

बुद्धिर्यस्य बलं तस्य **अथवा** स्वभावो दुरतिक्रमः ।

22. अधोलिखित शब्दाधारित **पंच** वाक्यानां निर्माणं कुरुत — 5 × 1 = 5

(i) पठित्वा (ii) श्रद्धावान्

(iii) भवान् (iv) उच्चैः

(v) तव ।

23. स्वपाठ्यपुस्तकात् **द्वौ** श्लोकौ लिखत, यौ प्रश्नपत्रेऽस्मिन् न समाविष्टौ । 2 + 2 = 4

24. 'वार्षिकोत्सवः' **अथवा** 'क्रीडाविषये सम्भाषणम् , विषय 6 - 8 वाक्येषु संस्कृतवार्तालापं लिखत । 3

25. स्वं 145 सी उदयपुरस्य गोकुलानन्दं मत्वा स्वमित्रं रमेशाय दीपावलीशुभाशयपत्रमेकं संस्कृते विलिखत । 3